251

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

षष्ठं

त्रिपुरभैरवीतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकाराः १८६७ वार्षिक २५ तमराङ्क

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

उ-१२ मैत्री ध्यानम् ।

॥ श्रीगणेशाय नमः ॥

शाक्तप्रमोदः ।

अथ त्रिपुरभैरवीतन्त्रम् ।

अथभैरवीध्यानम् ।

उद्यद्भानुसहस्रकान्तिमरुणक्षौमांशिरोमालिकां रक्तालिप्त पयोधराञ्जपपटीञ्चँविद्यामभीतिंवँरम् ॥ हस्ताब्जैर्दधतीन्त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं देवीम्बद्धहिमांशुरत्नमुकुटाञ्चँवन्देसमन्दस्मिताम् ॥



अथयन्त्रोद्धारः ।

पद्ममष्टदलोपेतन्नवयोन्याढ्यकर्ण्णिकम् ॥ चतुर्द्वारसमायुक्तं भूगृहँव्विलिखेत्ततः ॥



अथमन्त्रोद्धारः ।

ईशानोऽकारसय्युक्तः पश्चात्सैमितियोजयेत् ॥ हसकरीमिति ततो हसैंपश्चात्समुच्चरेत् ॥ अष्टाक्षरस्तुमन्त्रोऽयम्भैरव्यास्समुदाहृतः ॥ जपतोधारणाद्वापि सर्व्वसम्पत्प्रदायकः ॥

अथमन्त्रः ।

हसैंहसकरींहसैं ।

अथपूजाविधिः ।

प्रातःकृत्यादिप्राणायामान्तँव्विधाय पीठन्यासङ्कुर्य्यात् ॥ पूर्व्वोक्तक्रमेणाधारशक्त्यादि ह्रींज्ञानात्मनेनमइत्यन्तँव्विन्यस्य। हृत्पद्मस्यपूर्व्वादिकेसरेषु ॐइच्छायैनमः एवंज्ञानायैनमः क्रियायै० कामदायिन्यै० रत्यै० रतिप्रियायै० नन्दायै० मध्ये ऐंपरायै० अपरायै० हसौंसदाशिवमहाप्रेतपद्मासनायनमइत्यन्तँव्विन्यस्यऋष्यादिन्यासङ्कुर्य्यात् । यथा शिरसिदक्षिणामूर्त्त

येनमः। मुखेपङ्क्तिच्छन्दसेनमः। हृदित्रिपुरभैरव्यैदेवतायैनमः। गुह्येवाग्भववीजायनमः। पादयो×शाक्तिकशक्तयेनमः।सर्व्वाङ्गे कामराजायकीलकायनमः। तथाच दक्षिणामूर्त्तिसंहितायाम्। ऋषिस्तुदक्षिणामूर्त्तिश्शिरासिविन्यसेत्क्रमात्॥ छन्द×पङ्क्तिस्तुविज्ञेयोमुखेविन्यस्यदेवताम्॥ हृदिमेत्रिपुरेशानीवाग्भवम्बीजमुच्यते॥ शक्तिबीजंशक्तिरेव कामराजश्चकीलकम्॥ ततो नाभ्यादिचरणपर्य्यन्तंहंसरेनमः॥ हृदादिनाभिपर्य्यन्तङ्काम बीजम्प्रविन्यसेत्॥ सकलःरिंनमः शिरसिहृदयान्तंहंसरेनमः एवन्दक्षिणकरेआद्यबीजम्। वामकरेद्वितीयम्। उभयकरेतृतीयम्॥ यथा मूर्द्धिमूलाधारे हृदियथाशङ्क्तेनत्रीणिबीजानिविन्यसेत्॥ यथानिवन्धे॥ नाभेराचरणन्तद्वद्वाग्भवन्मन्त्रवित्तमः॥ हृदयान्नाभिपर्य्यन्तङ्कामबीजम्प्रविन्यसेत्॥शिरसोहृत्प्रदेशान्तन्तत्रयँविन्यसेत्ततः॥ आद्यन्द्वितीयङ्करयोस्ततस्त्रिरुभयोर्न्यसेत्॥मूर्ध्न्यांधारेचहृदयेभूयोवीजत्रयङ्क्रमात्॥ततोनवयोन्यात्मकविन्यासः॥आद्यम्बीजन्दक्षकर्णे द्वितीयम्बीजँव्वामकर्णे तृतीयंम्बीजञ्चिबुके एवंशङ्खयोर्व्वदनेनेत्रयोर्न्नसिअंसयोर्ज्जठरेकूर्प्परयो× कुक्षौजानुनोर्ल्लिङ्गेपादयोर्गुह्यपार्श्वयोर्हृदिस्तनयो×कण्ठे॥ यथानिबन्धे॥ नवयोन्यात्मकन्यासङ्कुर्य्याद्वीजैस्त्रिभि×क्रमात्॥ कर्णयोश्चिबुकेभूयः शङ्खयोर्व्वदनेपुनः॥नेत्रयोरपिविन्यसेदंसयोर्ज्जठरेपुनः॥ तत×कूर्प्परयो× कुक्षौजानुनोर्म्मूर्द्धमूर्द्धनि॥ पादयोर्गुह्यदेशेचपार्श्वयोर्हृदयाम्बुजे॥ स्तनद्वये कण्ठदेशेरत्यादिमथविन्यसेत्॥ अथरत्यादिन्यासः॥ मूलाधारे ऐंरत्यैनमः हृदिक्लींप्रीत्यैनमः भ्रुवोर्म्मध्येमनोभवायैनमः पुनः भ्रूमध्येसौः अमृतेश्यैनमः हृदिक्लींयोगेश्यैनमः मूलाधारेऐंविश्वयोन्यैनमः यथानिबन्धे। मुखेरतिंहृदिप्रीतिम्भ्रुवोर्म्मध्येमनोभवाम्॥ वा

लावीजैस्त्रिभिर्न्यस्यस्थानेष्वेषुविलोमतः ॥ अमृतेशीश्चयोगेशी विश्वयोर्निक्रमादिमाः॥ विलोमबीजैर्विन्यस्यमूर्त्तिन्यासंसमाचरेत् ॥ अथमूर्त्तिन्यासः ॥ मूर्ध्निहसरौंईशानमनोभवायनमः । वक्त्रेहसरें तत्पुरुषमकरध्वजायनमः । हृदिहसरूं अघोरकन्दर्प्पकुमारायनमः।गुह्येहसरींवामदेवमन्मथायनमः।पादयोःहसरांसद्योजातकामदेवायनमः ॥ एवमूर्द्ध्वप्राग्दक्षिणोत्तरपाश्चिमेषुमुखेषुईशानमनोभवादिपञ्चमूर्त्तीस्तत्तद्बीजादिपूर्व्वकान्यसेत् ॥ यथा निबन्धे ॥ स्वस्वपूजादिकंसर्व्वम्मूर्द्धीशानमनोभवम् ॥ न्यसेद्वक्त्रेतत्पुरुषमकरध्वजमेवच ॥ हृद्यघोरकुमारादिकन्दर्प्पन्तदनन्तरम् ॥ गुह्यदेशेप्रविन्यस्यवामदेवादिमन्मथम् ॥ सद्योजातङ्कामदेवम्पादयोर्विन्यसेत्ततः ॥ ऊर्द्ध्वप्राग्दक्षिणोत्तरपाश्चिमेषुमुखेषुतान् ॥ प्रविन्यसेद्यथापूर्व्वम्भृगुव्योमाग्निसंस्थितः ॥ सत्यादिपञ्चब्रह्मस्वाख्यम्बीजमेषाम्प्रकल्पितम् ॥ ततश्करयोरङ्गुलीषुपञ्चबाणान् पञ्चकामांश्चन्यसेत् ॥ यथा द्रांद्रविणेश्यैनमः अङ्गुष्ठयोः द्रींशोभिन्यैनमस्तर्ज्जन्योः। क्लींवशीकरिण्यैनमःमध्यमयोः।ब्लुंआकर्षिण्यैनमः अनामिकयोः । स्त्रींउन्मादिन्यैनमः कनिष्ठयोः।एवंह्रीकँामायनमःक्लींमन्मथायनमः ऐंकन्दर्प्पायनमः ब्लुंमकरध्वजायनमः स्त्रींमीनकेतनायनमः यथाज्ञानार्ण्णवे ॥ पञ्चबाणान् क्रमेणैवकराङ्गुलीषुविन्यसेत् ॥ न्यासस्तुस्त्रीलिङ्गेनात्रप्रयोगः ॥ तन्त्रेतथादर्शनात् ॥ अङ्गुष्ठादिकनिष्ठान्तङ्क्रमेणपरमेश्वरीम् ॥थान्तद्वयंसमालिख्यवह्निस्थन्तङ्क्रमेणतु ॥ मुखवृत्तेननेत्रेण वामेनपरिमण्डितम् ॥ बाणद्वयमितिप्रोक्तम्मादनम्भूमिसंस्थितम् ॥ चतुर्त्थं स्वरविद्याढचन्नादरूपञ्चवरानने ॥ कान्तवक्त्रेणसय्युक्तँञ्चवामकर्ण्णविभूषितम् ॥ विन्दुनादसमायुक्तं सर्वाङ्गश्चन्द्रमाश्प्रिये ॥ पञ्चबाणान्महेशानिनामानिशृणुपार्व्वति ॥ क्षो

भणोद्रावणोवश्यस्तथाकर्ष्षणसञ्ज्ञकः ॥ उन्मादश्चक्रमेणैवना मानिपरमेश्वरि ॥ कामस्तत्रैवविज्ञेयस्तेषाम्बीजानित्वंशृणु ॥ प रावीजम्मध्यवाणँव्वाग्भवम्परमेश्वरि॥तुर्य्यबाणन्ततश्चैवस्त्रीवीज न्तुक्रमात्प्रिये ॥ त्रिपुरासारे ॥ कपञ्चमंशुचिनयनान्तसय्युतं स वामदक्पवनगुणान्वितकरा ॥रविश्चरोहरिहयःखविन्दुनान्तँय्यंन्न न्तंस्थंलंङम्परान्वितोभृगुः ॥ पञ्चकामाइमेदेवि नामानिशृणुवल्लभे॥काममन्मथकन्दर्प्पमकरध्वजसञ्ज्ञकाः ॥मीनकेतुर्म्महेशानि पञ्चमःपरिकीर्त्तितः॥पञ्चकामान्ततोदेविनामानिशृणुवल्लभे ॥का ममन्मथकन्दर्प्पबाणस्थानेषुविन्यसेत् ॥ एतानिविन्यसेदेवकर न्यासस्ततःपरम् ॥ततःकराङ्गन्यासौ ॥ हसरां अङ्गुष्ठाभ्यां नमः। स्वाहाहसरीं तर्जनीभ्यांनमः।हसरूं मध्यमाभ्यांवषट् । हसरैंअना मिकाभ्यांहूम्।हसरौं कनिष्ठाभ्यांवौषट्।हसरः करतलकरपृष्ठाभ्यां फट्॥ एवंहृदयादि।यथानिवन्धे॥षड्दीर्घयुक्तेनाद्येनवीजेनाङ्गकि यामता॥ततोवाणन्यासः।मूर्ध्निद्रांद्राविण्यैनमःगुह्येक्लींआकर्षिण्यै नमःहृदिसम्मोहिन्यैनमः । यथानिबन्धे। द्रामाद्याद्राविणींम्मूर्ध्नि द्रीमाद्याङ्गेभिणीम्मते॥क्लींवशीकरणींवक्त्रेगुह्येक्लींबीजपूर्व्वकम् ॥ आकर्षिणींहृदिपुनःसग्गौलःभृगुसय्युतः॥ सम्मोहिनीक्रमादेवंबा णन्यासोयमीरितः ॥ एतेनउन्मादसम्मोहनयोरेकपय्यायः एषु स्थानेषुकामाँश्चविन्यस्य । यथाश्रीक्रमे । ललाटेवदनेदेविह दिनाभौचगुह्यके ॥एषुकामाँश्चविन्यस्यताराद्यास्सुभगादिकाः ॥ न्यसेदितिशेषः । ततःसुभगादिन्यासः । भालेऐंक्लींलूंस्त्रींसुभगा यैनमः भ्रूमध्येओंक्लींव्रूंस्त्रीं भगायैनमः। वदने भगसर्प्पिण्यैनमः, कण्ठिकायां भगमालिन्यैनमः, कण्ठेअनङ्गायैनमः, हृदि ५ अ नङ्गकुसुमायैनमः नाभौ ५ अनङ्गमेखलायैनमः लिङ्गमूले ५ अ नङ्गमदनायैनमः हृदि ५। यथानिबन्धे । भालेभ्रूमध्यवदनेक

ण्ठिकाकण्ठहृत्सुच ॥ नाभ्यधिष्ठानयोः पञ्चताराद्याः सुभगादि काः ॥ न्यस्तव्याविधिनादेवि मन्त्रिणासुभगाभगा ॥ भगस र्पिण्यथपरा भगमालिन्यनन्तरम् ॥ अनङ्गानङ्गकुसुमाभूयश्चा नङ्गमेखला ॥ अनङ्गमदनासर्प्पामन्दविभ्रममन्थरा ॥ वाक्का मबीजंकूँत्रींसस्तारापञ्चोदितास्त्वमी ॥ अथभूषणन्यासः ॥ शिरसिअंनमः भालेआँनमः इंईंभ्रुवोः एवंकर्ण्णयोः उँऊँनेत्रयोः ऋंॠंनासिकायाम् गण्डयोः लृंॡंएंओष्ठयोः ऐंओंदन्तपङ्क्तौ औंअंआस्ये अःचिबुके कंगले खंकण्ठे गंपार्श्वयोः घंङंस्तन द्वये चंछंदोर्म्मूलयोः जंझंकूर्प्परयोः जंझंपादयोः ञंचरणाङ्गुष्ठयोः टंठंपादयोः ढंणंनाभौ तंथुह्ये थंऊर्व्वोः दंधंजान्वोः नंपंजङ्घयोः फंबंग्रन्थिस्थानयोः भंमंचरणयोः यञ्चरणाङ्गुष्ठयोः रंकट्याम् लंकण्ठे वंग्रीवायाम् लंहृदि शंगुह्ये षं कर्ण्णयोः षंगण्डयोः संमौलौ ॥ हयस्थानिबन्धे॥न्यसेत्शिरसि भालेभ्रूकर्ण्णाक्षियुगलेवक्षगण्डयोरूरुपृष्ठयोः दन्तपङ्क्तौरास्येय स्येश्वरान् चिबुकेथपार्श्वयोःस्तनयुग्मकेदोर्म्मूलयोः कूर्प्परयोः पृष्ठदेशेततोनाभौ गुह्येपुनश्चोर्व्वोर्ज्जानुनोर्ज्जपयेस्ततःस्फिचोः पदतलयोःपश्चात् चरणाङ्गुल्योर्द्वयोः ॥ कादिवान्तान्यसेद्व र्ण्णान्स्थानेष्वेषुसमाहितः ॥ कट्यांग्रैवेयके पश्चात्कटितटेहृदि गुह्यके॥कर्ण्णयोर्ग्गण्डयोर्मौलौबलवान्राक्षसासहौ ॥ अस्यविमा नान्प्रविन्यस्येदेवन्देशिकसत्तमः॥ ततस्त्रिखण्डाम्मुद्राम्वद्धाध्या येत् ॥ उद्यद्भानुसहस्रकान्तिमरुणक्षौमांशिरोमालिकांरक्ता लिप्तपयोधराञ्जपपटींविद्यामभीतिंवरम् ॥हस्ताब्जैर्दधतीन्त्रि नेत्रविलसद्वक्त्रारविन्दश्रियन्देवीम्बद्धहिमांशुरत्नमुकुटांवन्देसम न्दस्मिताम् ॥ एवन्ध्यात्वा मानसैःसम्पूज्यशङ्खस्थापनङ्कुर्य्यात् ॥ आधारशक्त्यादिहृदींज्ञानात्मनेनम इत्येवंसम्पूज्यपूर्व्वादि

केसरेषु मध्येच । इच्छाज्ञानक्रियापश्चात् कामिनीकामहारिनी ॥ रतीरतिप्रियानन्दानवमीचमनोन्मनी ॥ एताऽप्रणवादि नमोऽन्तेनपूजयेत् ॥ तदेवम् ॥ परायै० अपरायै० परायै० परावत्यै० सदाशिवमहाप्रेतपद्मासनायनमः इतिसम्पूज्य प्रायोस्थोनिरन्तरालेश्रीविद्योक्तगुरुपङ्क्तिम्पूजयेत् । यथानिबन्धे । वाग्भवंरोहितोवापिश्रीकण्ठोलोहितोनलः ॥ दीर्घवाण्यैपरायैच पश्चादपरायैपुनः ॥सदाशिवम्महाप्रेतंङन्तम्पद्मासनम्मम ॥अनेनमनुनादद्यादासनंश्रीगुरूत्तमम्॥प्राङ्मध्ययोरन्तरालेपूजयेत्कल्पयेत्ततः ॥ पञ्चभिऽप्रणवैऽपूर्वन्तस्यामावाह्यदेवताम्॥तारोवाक्च्छक्तिकमलाहसखप्लैयशः स्मृताः ॥ तदशक्तौअँगुरुभ्योनमः ओंगुरुपादुकाभ्यान्नमः एवम्परमगुरुभ्योनमः परमगुरुपादुकाभ्यान्नमः ओंपरमेष्टिगुरुभ्योनमः परमेष्टिगुरुपादुकाभ्यान्नमः आचार्य्येभ्यो० आचार्य्यपादुकाभ्यो० ॥ अस्यपूजायन्त्रन्निबन्धे ॥ पद्ममष्टदलोपेतन्नवयोन्याढ्यकर्णिकम् ॥ चतुर्द्वारसमायुक्तम्भूगृहँव्विलिखेत्ततः ॥ ऐंह्रींसहसपह केह्यैं इतिमन्त्रेणबिन्दुचक्रेमूर्त्तिसङ्कल्पन्त्रिखण्डमुद्रयादेवीन्ध्यात्वावाहयेत् ॥ ओंदेवेशिभद्रसुलभे परिवारसमन्विते ॥ यावत्त्वाम्पूजयिष्यामि तावत्त्वंसुस्थिराभव ॥ इत्यावाह्य प्रीत्यैनमः उग्रकोणे मनोभवायैनमः तताऽकेसरेषुअग्न्यादिकोणेषुमध्येदिक्षुच पूर्व्वोक्ताङ्गमन्त्रेणपूजामारभेत् ॥ अथज्ञानार्णवे ॥ अग्नीशासुरवायुमध्येदिग्वन्धम्पूजयेत् ॥ ततः उत्तरेद्रांद्राविण्यैनमः द्रीक्षोभिण्यैनमः दक्षिणेक्लींवशीकरिण्यैनमः लोपाकर्षिण्यैनमः । आग्नेय्याम् ॥ सम्मोहिन्यैनमः ॥ एवम् उत्तरेह्रींकामायनमःक्लींमन्मथायनमः ॥ दक्षिणेऐंकन्दर्प्पायनमःक्लुंमकरध्वजायनमः ॥ आग्नेय्याम् स्त्रींमीनकेतनायनमः ॥ यथाज्ञानार्णवे॥ उत्तरस्यान्द्रयन्दिशि

आग्नेयेचैकङ्कमेणैवपञ्चबाणान्क्रमाद्यजेत् ॥ पञ्चबाणस्तथादे वबाणवत्परिपूजयेत् ॥ बाणवत् ॥ ततो ऽष्टयोनिषुपूर्व्वादि ऐंक्लींस्त्रींसः सुभगायैनमः ॥ एवंऐं० ४ भगायैनमः ऐं० भगस र्प्पिण्यैनमः ऐं०भगमालिन्यैनमः ऐं०४अनङ्गायैनमः एवंऐं०४ अनङ्गकुसुमायैनमःऐं०४अनङ्गमेखलायैनमःऐं०४अनङ्गमदना यैनमः ॥ ततोष्टपत्रेषुपूर्व्वादि ओंअसिताङ्गब्राह्मीभ्यान्नमः ओं उमामहेश्वराभ्यान्नमः ओंचण्डकौमारीभ्यान्नमः ओंक्रोधवै ष्णवीभ्यान्नमः ओंउत्तरवाराहीभ्यान्नमः ओंकापालीन्द्राणीभ्या न्नमः ओंभीषणचामुण्डाभ्यान्नमः ओंसंहारमहालक्ष्मीभ्यान्नमः यथानिवन्धे ॥ अष्टमेषष्ठशक्तौचपूजयेत्सुभगादिकाः॥मातरोभैर व्याद्याश्च मदविभ्रमविह्वलाः ॥ अष्टपत्रेषुसम्पूज्ययथावत्कुसुमा वधि ॥ तद्बहिरिन्द्रादीन्सम्पूज्यधूपादिविसर्ज्जनान्तंकर्म्मसमा पयेत् ॥ किन्तुनैवेद्यानन्तरंश्रीविद्योक्तबलिचतुष्टयन्देयामिति ॥ अस्यपुरश्चरणं दशलक्षजपःहोमस्तुद्वादशसहस्रम् ॥ यथानिब न्धे ॥ दीक्षाम्प्राप्यजपेन्मन्त्रन्तत्त्वलक्षञ्जितेन्द्रियः ॥ पुष्पैर्भा नुसहस्राणिजुहुयादक्षमक्षजैः ॥ इतिपूजा ॥

अथ स्तोत्रम् ।

श्रीभैरवउवाच ॥ ब्रह्मादयःस्तुतिशतैरपिसूक्ष्मरूपाञ्जानन्ति नैवजगदादिमनादिमूर्त्तिम् ॥ तस्माद्वयङ्कचनतान्नवकुङ्कुमा भांस्थूलांस्तुमः सकलवाङ्मयमातृभूताम् ॥ १॥ सद्यःसमुद्यतस हस्रदिवाकराभां विद्याक्षसूत्रवरदाभयचिह्नहस्ताम् ॥ नेत्रोत्पलै स्त्रिभिरलङ्कृतवक्त्रपद्मांत्वांहारभाररुचिरान्त्रिपुरेभजामः ॥ २ ॥ सिन्दूरपूररुचिरङ्कचभारनम्रञ्जन्मान्तरेपुकृतपुण्यफलैकगम्यम्॥ अन्योन्यभेदकलहाकुलमानभेदैर्जानन्तिकिञ्जडधियस्तवरूपम

म्ब ॥ ३ ॥ स्थूलांवदन्तिमुनयःश्रुतयोगृणन्ति सूक्ष्मांवदन्ति वचसामधिवासमन्ये ॥ त्वाम्मूलमाहुरपरेजगताम्भवानि मन्या महेवयमपारकृपाम्बुराशिम् ॥ ४ ॥ चन्द्रावतंसकलितांश रदिन्दुशुभ्राम्पञ्चाशदक्षरमयीं हृदिभावयन्ति ॥ त्वाम्पुस्तकञ्च पपटीममृताम्भकुम्भां व्याख्याञ्चहस्तकमलैर्दधतींत्रिनेत्राम् ॥ ५ ॥ शम्भुस्त्वमद्रितनयाकलितार्द्धभागोविष्णुस्त्वमम्बकम लापरिणद्धदेहः ॥ पद्मोद्भवस्त्वमसिवागधिवासभूमिर्येषाङ्गि याश्चजगति त्रिपुरेत्वमेव ॥ ६ ॥ आश्रित्यवाग्भवभवांश्चतुरः परादीन्भावान्पदात्तुविहितान्समुदीरयन्तीम् ॥ कालादिभिश्च करणैः परदेवतान्त्वां सँव्विन्मयींहृदिकदापिनविस्मरामि ॥ ७ ॥ आकुञ्चयवायुमभिजित्यचवैरिषट्कमालोक्यनिश्चलधि यानिजनासिकाग्रम्॥ ध्यायन्तिमूर्द्धिकलितेन्दुकलावतंसंत्वद्रूप मम्बकृतिनस्तरुणार्कमित्रम् ॥ ८ ॥ त्वम्प्राप्यमन्मथरिपोर्व्व पुरर्द्धभागंसृष्टिंकरोपिजगतामितिवेदवादः ॥ सत्यन्तदद्रितन येजगदेकमातर्नोचेदशेषजगतः स्थितिरेवनस्यात् ॥ ९ ॥ पू जाँव्विधायकुसुमैः सुरपादपानाम्पीठेतवाम्बकनकाचलकन्दरे षु ॥ गायन्तिसिद्धवनिताः सहकिन्नरीभिरास्वादितामृतरसारुण पद्मनेत्राः ॥ १० ॥ विद्युद्विलासवपुषः श्रियमावहन्तीय्यान्तीं स्ववासभवनाच्छिवराजधानीम्॥ सौषुम्नमार्गकमलानिविकास यन्तीन्देवीम्भजेतपरमामृतसिक्तगात्राम् ॥ ११॥ आनन्दजन्म भवनम्भवनंश्रुतीनाञ्चैतन्यमात्रतनुमम्बतवाश्रयामि ॥ ब्रह्मेश विष्णुभिरुपासितपादपद्मां सौभाग्यजन्मवसतिन्त्रिपुरेयथावत् ॥ १२ ॥ सर्व्वार्त्थभाविभुवनंसृजतीन्दुरूपायातद्भिर्त्तिपुनरर्क तनुःस्वशक्त्या ॥ ब्रह्मात्मिकाहरतितं सकलय्युगान्ते तांशारदा म्मनसिजातुनविस्मरामि ॥ १३ ॥ नारायणीतिनरकार्ण्णवतारि

णीतिगौरीतिखेदशमनीतिसरस्वतीति ॥ ज्ञानप्रदेतिनयनत्रयभू षितेति त्वामद्रिराजतनयेविबुधावदन्ति ॥ १४ ॥ येस्तुवन्तिज गन्मातःश्लोकैर्द्वादशभिःक्रमात् ॥ त्वामनुप्राप्यवाक्सिद्धिम्प्रा प्नुयुस्तेपरांश्रियम् ॥ १५ ॥ इतितेकथितन्देवि पञ्चाङ्गम्भैरवीम यम् ॥ गुह्याङ्गोप्यतमङ्गोप्यङ्गोपनीयंस्वयोनिवत् ॥ १६ ॥ इति श्रीरुद्रयामलेउमामहेश्वरसंवादे पञ्चाङ्गखण्डनिरूपणेश्रीभैरवी स्तोत्रंसम्पूर्णम् ॥

अथकवचम् ।

श्रीपार्व्वत्युवाच ॥ देवदेवमहादेव सर्व्वशास्त्रविशारद ॥ कृपाङ्कुरुजगन्नाथ धर्म्मज्ञोसिमहामते ॥ १ ॥ भैरवीयापुराप्रो क्ताविद्यात्रिपुरपूर्व्विका ॥ तस्यास्तुकवचन्दिव्यम्मह्याङ्कथयतत्त्व तः ॥२॥ तस्यास्तुवचनंश्रुत्वाजगादजगदीश्वरः ॥ अद्भुतङ्कवच न्देव्या भैरव्यादिव्यरूपिवै ॥ ३ ॥ ईश्वरउवाच ॥ कथयामिम हाविद्याकवचंसर्व्वदुर्ल्लभम्॥शृणुष्वत्वञ्चविधिना श्रुत्वागोप्यन्त वापितत् ॥ ४ ॥ यस्याःप्रसादात्सकलंविभर्म्मिभुवनत्रयम् ॥ य स्याः सर्व्वंसमुत्पन्नंयस्यामद्यापितिष्ठति ॥ ५ ॥ माता पिताजगद्धन्याजगद्ब्रह्मस्वरूपिणी ॥ सिद्धिदात्रीचसिद्धास्या दसिद्धादुष्टजन्तुषु ॥ ६ ॥ सर्व्वभूताहितकरीसर्व्वभूतस्वरू पिणी ॥ ककारीपातुमान्देवीकामिनीकामदायिनी ॥ ७ ॥ ए कारीपातुमान्देवी मूलाधारस्वरूपिणी ॥ इकारीपातुमान्देवी भूरिसर्व्वसुखप्रदा ॥ ८ ॥ लकारीपातुमान्देवी इन्द्राणीवरवल्ल भा ॥ ह्रींकारीपातुमान्देवीसर्व्वदाशम्भुसुन्दरी ॥ ९ ॥ एतैर्व्व र्ण्णैर्म्महामायाशाम्भवीपातुमस्तकम्॥ ककारेपातुमान्देवीशर्व्वा णीहरगेहिनी ॥ १० ॥ मकारेपातुमान्देवी सर्व्वपापप्रणाशि

नी ॥ ककारेपातुमान्देवी कामरूपधरासदा ॥ ११ ॥ कका रे पातुमान्देवीशम्बरारिप्रियासदा ॥ पकारीपातुमान्देवी धरा धरणिरूपधृक् ॥ १२ ॥ ह्रींकारीपातुमान्देवी आकारार्द्धश रीरिणी ॥ एतैर्व्वर्णैर्म्महामायाकामराहुप्रियावतु ॥ १३ ॥ मका रः पातुमान्देवी सावित्रीसर्व्वदायिनी ॥ ककारःपातुसर्व्वत्रकला म्बरस्वरूपिणी ॥ १४ ॥ लकारःपातुमान्देवी लक्ष्मीःसर्वसुल क्षणा ॥ ह्रींपातुमान्तुसर्व्वत्र देवीत्रिभुवनेश्वरी ॥ १५ ॥ एतैर्व्व र्णैर्म्महामाया पातुशक्तिस्वरूपिणी ॥ वाग्भवम्मस्तकम्पातु वद नङ्कामराजिका ॥ १६ ॥ शक्तिस्वरूपिणीपातुहृदयय्यँन्त्रसिद्धि दा ॥ सुन्दरीसर्व्वदापातु सुन्दरीपरिरक्षति ॥ १७ ॥ रक्त वर्णासदापातु सुन्दरीसर्व्वदायिनी ॥ नानालङ्कारसय्युक्तासु न्दरीपातुसर्व्वदा ॥ १८ ॥ सर्व्वाङ्गसुन्दरीपातु सर्व्वत्राशिवदायि नी ॥ जगदाह्लादजननी शम्भुरूपा च मां सदा॥ १९ ॥ सर्व्वम न्त्रमयीपातु सर्व्वसौभाग्यदायिनी ॥सर्व्वलक्ष्मीमयीदेवी परमा नन्ददायिनी ॥ २० ॥ पातुमां सर्व्वदादेवी नानाशङ्खनिधिः शिवा ॥ पातुपद्मनिधिर्देवी सर्व्वदाशिवदायिनी ॥२१॥ दक्षिणा मूर्त्तिर्म्मांम्पातुऋषिःसर्व्वत्रमस्तके ॥ पङ्क्तिश्छन्दःस्वरूपातुमुखे पातुसुरेश्वरी ॥ २२ ॥ गन्धाष्टकात्मिकापातुहृदयंशङ्करीसदा॥ सर्व्वसम्मोहिनीपातु पातुसङ्क्षोभिणीसदा॥२३॥सर्व्वसिद्धिप्रदा पातु सर्व्वाकर्ष्पणकारिणी॥क्षोभिणीसर्व्वदापातुवशिनीसर्व्वदाव तु ॥२४॥ आकर्ष्षिणीसदापातु सम्मोहिनीसदावतु ॥ रतिर्देवी सदापातु भगाङ्गासर्व्वदावतु ॥ २५ ॥ महेश्वरीसदापातु कौ मारीसर्व्वदावतु॥सर्व्वाह्लादनकारीमाम्पातुसर्व्ववशङ्करी ॥२६॥ क्षेमङ्करीसदापातुसर्वाङ्गसुन्दरीतथा ॥ सर्व्वाङ्गयुवतिःसर्व्वसर्व्व सौभाग्यदायिनी॥२७॥वाग्देवीसर्व्वदापातु वाणिनीसर्व्वदावतु॥

वशिनीसर्व्वदापातुमहासिद्धिप्रदासदा ॥२८॥ सर्व्वविद्राविणीपा
तुगणनाथःसदावतु॥दुर्ग्गादेवीसदापातुबटुकःसर्व्वदावतु ॥२९॥
क्षेत्रपालःसदापातु पातुचावरिशान्तिका ॥ अनन्तःसर्व्वदापा
तु वराहःसर्व्वदावतु ॥३०॥ पृथिवीसर्व्वदापातु स्वर्ण्णसिंहासन
न्तथा ॥ रक्तामृतञ्चसततम्पातुमांसर्व्वकालतः॥३१॥सुराण्णवः
सदापातुकल्पवृक्षःसदावतु॥श्वेतच्छत्रंसदापातुरक्तदीपः सदावतु
॥३२॥ नन्दनोद्यानंसततम्पातुमांसर्व्वसिद्धये॥ दिक्पालाःसर्व्व
दापान्तुद्वन्द्वौघाःसकलास्तथा ॥३३॥वाहनानिसदापान्तुअस्त्रा
णिपान्तुसर्व्वदा॥शस्त्राणिसर्व्वदापान्तुयोगिन्यश्पान्तुसर्व्वदा॥
॥ ३४ ॥ सिद्धाश्पान्तुसदादेवी सर्व्वसिद्धिप्रदावतु॥ सर्व्वाङ्गसु
न्दरीदेवी सर्व्वदावतुमान्तथा ॥३५॥ आनन्दरूपिणी देवीचि
त्स्वरूपाचिदात्मिका ॥ सर्व्वदासुन्दरीपातुसुन्दरीभवसुन्दरी ॥
॥ ३६ ॥ पृथग्देवालयेघोरेसङ्कटेदुर्ग्गमेगिरौ॥ अरण्येप्रान्तरेवा
पिपातुमांसुन्दरीसदा ॥ ३७ ॥ इदङ्कवचमित्युक्तम्मन्त्रोद्धारश्च
पार्व्वति ॥ यश्पठेत्प्रयतोभूत्वात्रिसन्ध्यन्नियतःशुचिः ॥ ३८ ॥
तस्यसर्व्वार्त्थसिद्धिःस्याद्यद्यन्मनसिवर्त्तते ॥गोरोचनाकुङ्कुमेन
रक्तचन्दनकेनवा ॥३९॥स्वयम्भूकुसुमैःशुक्लैर्भूमिपुत्रेशनौसुरे॥
श्मशानेप्रान्तरेवापिशून्यागारे शिवालये ॥ ४० ॥ स्वश
क्त्यागुरुणायन्त्रम्पूजयित्वाकुमारिकाः॥तन्मनुम्पूजयित्वाचगुरु
पङ्क्तिन्तथैवच ॥ ४१ ॥ देव्यैबलिन्निवेद्याथनरमार्ज्जारसूकरैः ॥
नकुलैर्म्महिषैर्म्मेषैश्पूजयित्वाविधानतः ॥४२ ॥ धृत्वासुवर्ण्णम
ध्यस्तङ्कण्ठेवादक्षिणेभुजे ॥ सुतिथौशुभनक्षत्रेसूर्य्यस्योदयने
तथा ॥ ४३॥ धारयित्वाचकवचंसर्व्वसिद्धिँल्लभेन्नरः ॥ कवचस्य
चमाहात्म्यन्नाहवँर्ष्वशतैरपि ॥४४ ॥ शक्नोमितुमहेशानिवक्तुन्त
स्यफलन्तुयत् ॥ नदुर्भिक्षफलन्तत्र नचापिपीडनन्तथा ॥४५॥

सर्व्वविघ्नप्रशमनं सर्व्वव्याधिविनाशनम् ॥४६॥ सर्व्वरक्षाकरञ्च न्तोश्चतुर्व्वर्गफलप्रदम् ॥ यत्रकुत्रनवक्तव्यन्नदातव्यङ्कदाचन ॥ ॥ ४७ ॥ मन्त्रम्प्राप्यविधानेन पूजयेत्सततंसुधीः ॥ तत्रापिदुर्ल्लभम्मन्ये कवचन्देवरूपिणम् ॥ ४८ ॥ गुरोःप्रसादमासाद्यविद्याम्प्राप्यसुगोपिताम् ॥ तत्रापिकवचन्दिव्यन्दुर्ल्लभम्भुवनत्रये ॥ ॥४९॥ श्लोकञ्चैवास्तवमेकञ्चायःपठेत्प्रयतःशुचिः ॥ तस्यसर्व्वार्थसिद्धिःस्याच्छङ्करेणप्रभाषितम् ॥ ५० ॥ गुरुर्देवोहरः साक्षात्पत्नीतस्यचपार्व्वती ॥ अभेदेनयजेद्यस्तुतस्यसिद्धिरदूरतः ॥ ५१ ॥ इतिश्रीरुद्रयामलेभैरवभैरवीसँवादेश्रीभैरवीकवचं सम्पूर्णम् ॥ ५१ ॥

अथ हृदयम्।

मेरौगिरिवरेशानी शिवन्ध्यानपरायणम् ॥ पार्व्वतीपरिपप्रच्छपरानुग्रहवाञ्छया ॥१॥ श्रीपार्व्वत्युवाच ॥ भगवंस्त्वन्मुखाम्भोजाच्छ्रुताधर्म्माअनेकशः ॥ पुनश्श्रोतुंसमिच्छामिभैरवीस्तोत्रमुत्तमम् ॥ २ ॥ श्रीशङ्करउवाच ॥ शृणुदेविप्रवक्ष्यामिभैरवीहृदयाह्वयम् ॥ स्तोत्रन्तुपरमम्पुण्यंसर्व्वकल्याणकारणम् ॥ ॥ ३ ॥ यस्यश्रवणमात्रेणमङ्गलम्भवतिध्रुवम् ॥ विनाध्यानादिनावापिभैरवीपरितुष्यति ॥ ४ ॥ ओमस्यश्रीभैरवीहृदयमन्त्रस्यदक्षिणामूर्त्तिर्ऋषिःपङ्क्तिश्छन्दोभयविध्वंसिनीभैरवीदेवताहकारोबीजंरींशक्तिरैः कीलकंसर्व्वभयविध्वंसनार्त्थेपाठेविनियोगः ॥ अथाङ्गन्यासः ॥ ओंह्रींहृदयायनमःओंश्रींशिरसेस्वाहा ओंऐंशिखायैवषट् औंह्रींकवचायहूम् ओंश्रींनेत्रत्रयायवौषट् ओंऐंअस्त्रायफट् ॥ एवंकरन्यासः ॥ अथध्यानम्॥देवैर्द्धर्य्यैयान्त्रिनेत्रामसुरदलघनारण्यरोराग्निरूपां रौद्रींरक्ताम्बराढ्यांरति

घटिघटितोरोजयुग्मोग्ररूपाम् ॥ चन्द्रार्द्धभ्राजिभव्याभरणकरल सद्भालविम्बाम्भवानींसिन्दूरापूरिताङ्गीन्त्रिभुवनजननीम्भैरवी म्भावयामि ॥ १ ॥ भवभ्रमत्समस्तभूतवेदमार्ग्गदायिनीन्दुर न्तदुःखदारिणीव्विँदारिणींसुरद्रुहाम् ॥ भवप्रदाम्भवान्धकारभे दनप्रभाकरामितप्रभाम्भवच्छिदाम्भजामिभैरवींसदा ॥ २ ॥ उरःप्रलम्बिताहिमाल्यचन्द्रभालभूषणान्नवाम्बुदप्रभां सरोज चारुलोचनत्रयाम् ॥ सुपर्व्ववृन्दवन्दितां सुरापदन्तकारिकाम्भ वानुभावभाविनीम्भ० ॥ २॥ अखण्डभूमिमण्डलैकभारधीरधा रिणींसुभक्तिभावितात्मनाँव्विभूतिभव्यदायिनीम्॥ भवप्रपञ्चका रिणींव्विहारिणीम्भवाम्बुधौ भवस्यहृद्यभाविनीम्भ० ॥३॥ शर च्चमत्कृताच्चर्य्यचन्द्रचन्द्रिकाविरोधिकप्रभावतीमुखाब्जमञ्जुमा धुरीमिलद्विराम् ॥ भुजङ्गमालयानृमुण्डमालयाचमण्डितांसुभ क्तिमुक्तिभूतिदाम्भजामिभैरवींसदा ॥४ ॥ सुधाशुसूर्य्यवह्निलोच नत्रयान्वितानताननान्नरान्तकान्तकप्रभूतिपर्व्वदत्तदक्षिणाम् ॥ समु ण्डचण्डखण्डनप्रचण्डचन्द्रहासिनीन्तमोमतिप्रकाशिनीम्भजा मिभैरवींसदा ॥५॥त्रिशूलिनीन्त्रिपुण्ड्रनीन्त्रिखण्डिनीन्त्रिदण्ड नीङ्कृणत्रयातिरक्तमत्यचिन्त्यचित्स्वरूपिणीम् ॥ सवासवा दितेयवैरिवृन्दवंशभेदिनीम्भवप्रभावभाविनीम्भजामिभैरवींसदा ॥ ६ ॥ सुदीप्तकोटिबालभानुमण्डलप्रभाङ्गभादिगन्तदारिता न्धकारभूरिपुञ्जपद्धतिम् ॥ द्विजन्मनित्यधर्म्मनीतिवृद्धिलग्नमा नसां सरोजरोचिराननाम्भजामिभैरवींसदा ॥ ७ ॥ चल त्सुवर्ण्णकुण्डलप्रभोल्लसत्कपोलरुक्समाकुलाननाम्बुजस्थशुभ्र कीरनासिकाम् ॥ सचन्द्रभालभैरवस्यदर्शनस्पृहच्चकोरनील कञ्जदर्शनाम्भजामिभैरवींसदा ॥ ८ ॥ इमंहृदाख्यसङ्गतस्त वम्पठन्तियेऽनिशम्पतन्तितेकदापिनान्धकूपरूपवद्भवे ॥ भव

न्ति चप्रभूतिभक्तिमुक्तिमन्तउज्ज्वलास्ततःप्रसीदतिप्रमोदमान साचभैरवी॥९॥यशोजगत्यजस्रमुज्ज्वलञ्चयत्यलंसमेनतस्यजाय तेपराजयोञ्जसाजगत्त्रये॥ सदास्तुतिंशुभामिमाम्पठत्यनन्यमान सोभवन्तितस्यसम्पदोपि सन्ततंसुखप्रदाः॥१०॥ जपपूजादि कास्सर्व्वाः स्तोत्रपाठादिकाश्चयाः॥ भैरवीहृदयस्यास्य कला न्नार्हन्तिषोडशीम्॥११॥किमत्रबहुनोक्तेन शृणुदेविमहेश्वरि॥ ना तःपरतरङ्किञ्चित्पुण्यमस्तिजगत्त्रये॥१२॥इतिश्रीभैरवकुलसर्व्व स्वेश्रीभैरवीहृदयस्तोत्रंसमाप्तम्॥

अथशतनाम!

श्रीदेव्युवाच॥ कैलासवासिन्भगवन्प्राणेश्वरकृपानिधे॥ भ क्तवत्सलभैरव्यानाम्नामष्टोत्तरंशतम्॥ १॥ नश्रुतन्देवदेवेश व दमान्दीनवत्सल॥ श्रीशिवउवाच॥ शृणुप्रियेमहागोप्यन्नाम्ना मष्टोत्तरंशतम्॥ २॥ भैरव्याःशुभदंसेव्यं सर्व्वसम्पत्प्रदायकम्॥ यस्यानुष्ठानमात्रेण किन्नसिद्ध्यतिभूतले॥ ३॥ ॐ भैर वीभैरवाराध्याभूतिदाभूतभावना॥ आर्य्याब्राह्मीकामधेनुःस र्व्वसम्पत्प्रदायिनी॥ ४॥ त्रैलोक्यवन्दितादेवी महिषासुरम र्दिनी॥ मोहन्नीमालती माला महापातकनाशिनी॥ ५॥ क्रो धिनीक्रोधनिलया क्रोधरक्तेक्षणाकुहूः॥ त्रिपुरा त्रिपुराधारा त्रिनेत्राभीमभैरवी॥ ६॥ देवकीदेवमाताचदेवदुष्टविनाशिनी॥ दामोदरप्रियादीर्घादुर्ग्गादुर्ग्गतिनाशिनी॥ ७॥ लम्बोद रीलम्बकर्ण्णा प्रलम्बितपयोधरा॥ प्रत्यङ्गिराप्रतिपदा प्रणतक्ले शनाशिनी॥ ८॥ प्रभावतीगुणवतीगणमातागुहेश्वरी॥ क्षी राब्धितनयाक्षेम्याजगत्त्राणविधायिनी॥ ९॥ महामारीमहा मोहा महाक्रोधामहानदी॥ महापातकसंहन्त्रीमहामोहप्रदायि

नी ॥ १० ॥ विकरालामहाकाला कालरूपाकलावती ॥ कपालखट्वाङ्गधराखड्गखर्प्परधारिणी ॥ ११ ॥ कुमारीकुङ्कुमप्रीता कुङ्कुमारुणराञ्जिता ॥ कौमोदकीकुमुदिनी कीर्त्यांकीर्त्तिप्रदायिनी ॥ १२ ॥ नवीनानीरदानित्यानन्दिकेश्वरपालिनी॥घर्घरा घर्घरारावा घोराघोरस्वरूपिणी ॥ १३ ॥ कलिघ्नीकलिधर्मघ्नी कलिकौतुकनाशिनी ॥ किशोरीकेशवप्रीताक्लेशसङ्घनिवारिणी ॥ १४ ॥ महोन्मत्तामहामत्ता महाविद्यामहीमयी ॥ महायज्ञा महावाणीमहामन्दरधारिणी ॥ १५॥ मोक्षदामोहदामोहामुक्तिमुक्तिप्रदायिनी ॥ अट्टाट्टहासनिरता क्वणन्नूपुरधारिणी ॥१६॥ दीर्घदंष्ट्रादीर्घमुखीदीर्घघोणाचदीर्घिका॥ दनुजान्तकरीदुष्टादुःखदारिद्र्यभञ्जिनी ॥ १७ ॥ दुराचाराचदोषघ्नी दमपत्नीदयापरा ॥ मनोभवामनुमयी मनुवंशप्रवर्द्धिनी ॥ १८ ॥ श्यामाश्यामतनुः शोभा सौम्याशम्भुविलासिनी ॥ इतितेकथितन्दिव्यन्नाम्नामष्टोत्तरंशतम् ॥ १९ ॥ भैरव्यादेवदेवेश्यास्तवप्रीत्यैसुरेश्वरि ॥ अप्रकाश्यमिदङ्गोप्यम्पठनीयम्प्रयत्नतः ॥ २० ॥ देवीन्ध्यात्वासुराम्पीत्वा मकारपञ्चकैःप्रिये ॥ पूजयेत्सततम्भक्त्या पठेत्स्तोत्रमिदंशुभम् ॥ २१ ॥ षण्मासाभ्यन्तरेसोपि गणनाथसमोभवेत् ॥ किमत्रबहुनोक्तेन त्वदग्रेप्राणवल्लभे ॥ २२ ॥ सर्व्वज्ञानासिसर्व्वज्ञे पुनर्म्मांम्परिपृच्छसि ॥ नदेयम्परशिष्येभ्यो निन्दकेभ्योविशेषतः ॥ २३ ॥ इति श्रीभैरव्यष्टोत्तरशतनामस्तोत्रंसम्पूर्णम् ॥

अथ सहस्रनाम ।

महाकालभैरवउवाच ॥ अथवक्ष्येमहेशानि देव्यानामसहस्रकम् ॥ यत्प्रसादान्महादेवि चतुर्व्वर्ग्गफलँल्लभेत् ॥१॥ सर्व्वरोग

प्रशमनं सर्व्वमृत्युविनाशनम्॥ सर्व्वसिद्धिकरंस्तोत्रन्नात२परतरः स्तवः ॥ २ ॥ नात२परतराविद्यातीर्थन्नात२परंस्मृतम् ॥ यस्यां सर्व्वसमुत्पन्नय्यँस्यामद्यापितिष्ठति ॥ ३ ॥ लयमेष्यतितत्सर्व्व लँयकालेमहेश्वरि ॥ नमामित्रिपुरान्देवीम्भैरवींभयमोचिनीम्॥ ॥ ४ ॥ सर्व्वसिद्धिकरींसाक्षान्महापातकनाशिनीम् ॥ अस्यश्री त्रिपुरभैरवीसहस्रनामस्तोत्रस्यभगवानृषिः ॥ पङ्क्तिश्छन्दआ द्याशक्तिः भगवतीत्रिपुरभैरवीदेवता॥ सर्व्वकामार्त्थसिद्ध्यर्थेज पेविनियोगः ॥ त्रिपुरापरमेशानी योगसिद्धिनिवासिनी ॥ स र्व्वमन्त्रमयीदेवीसर्व्वसिद्धिप्रवर्त्तिनी ॥ सर्व्वाधारमयीदेवी सर्व्व सम्पत्प्रदाशुभा ॥ योगिनीयोगमाताच योगसिद्धिप्रवर्त्तिनी ॥ योगिध्येयायोगमयी योगयोगनिवासिनी ॥ हेलालीलातथा क्रीडा कालरूपप्रवर्त्तिनी॥कालमात्ताकालरात्रि२कालीकमलवा सिनी ॥ कमलाकान्तिरूपाच कामराजेश्वरीक्रिया ॥ कटु२कप टकेशाच कपटाकुलटाकृतिः ॥ कुमुदार्च्चिकाकान्ति२कालरा त्रिप्रियासदा ॥ घोराकाराघोरतरा धर्म्माधर्म्मप्रदामतिः ॥ घण्टाघर्घ्घरदाघण्टाघण्टानादप्रियासदा॥सूक्ष्मासूक्ष्मतरास्थूला अतिस्थूलासदामतिः॥अतिसत्यासत्यवती सत्यसङ्केतवासिनी॥ क्षमाभीमातथाभीमा भीमनादप्रवर्त्तिनी ॥ भ्रमरूपाभयहरा भ यदाभयनाशिनी ॥ श्मशानवासिनीदेवीश्मशानालयवासिनी॥ शवासनाशवाहारा शवदेहाशिवाशिवा ॥ कण्ठदेशशवाहारा शवकङ्कणधारिणी ॥ दन्तुरासुदतीसत्या सत्यसङ्केतवासिनी ॥ सत्यदेहासत्यहारा सत्यवादनिवासिनी ॥ सत्यालयासत्यसङ्गा सत्यसङ्गरकारिणी ॥ असङ्गासाङ्गरहिता मुसङ्गासङ्गमोहिनी॥ मायामतिर्म्महामाया महामखविलासिनी ॥ गलद्रुधिरधाराच मुखद्वयनिवासिनी॥सत्यायासासत्यसङ्गा सत्यसङ्गतिकारिणी॥

असङ्गासङ्गनिरता सुसङ्गासङ्गवासिनी ॥ सदासत्यामहास त्या मांसपाशासुमांसका ॥ मांसाहारामांसधरा मांसाशीमांस भक्षका ॥ रक्तपानारक्तरुचिरारक्तारक्तवल्लभा ॥ रक्ताहारार क्तप्रिया रक्तनिन्दकनाशिनी ॥ रक्तपानप्रियाबाला रक्तदेशासु रक्तिका ॥ स्वयम्भूकुसुमस्थाच स्वयम्भूकुसुमोत्सुका ॥ स्व यम्भूकुसुमाहारास्वयम्भूनिन्दकासना ॥ स्वयम्भूपुष्पकप्रीता स्वयम्भूपुष्पसम्भवा ॥ स्वयम्भूपुष्पहाराढ्या स्वयम्भूनिन्द कान्तका ॥ कुण्डगोलविलासीच कुण्डगोलसदामतिः ॥ कुण्ड गोलप्रियकरी कुण्डगोलसमुद्भवा ॥ शुक्रात्मिकाशुक्रकरासुशु क्राचसुशुक्तिका ॥ शुक्रपूजकपूज्याच शुक्रनिन्दकनिन्दका ॥ र क्तमाल्यारक्तपुष्पा रक्तपुष्पकपुष्पका ॥ रक्तचन्दनसिक्ताङ्गी रक्तचन्दननिन्दका ॥ मत्स्यामत्स्यप्रियामान्या मत्स्यभक्षा महोदया ॥ मत्स्याहारामत्स्यकामा मत्स्यनिन्दकनाशिनी ॥ केकराक्षीतथाक्रूरा क्रूरसैन्यविनाशिनी ॥ क्रूराङ्गीकुलिशाङ्गी च चक्राङ्गीचक्रसम्भवा ॥ चक्रदेहाचक्रहारा चक्रकङ्कालवासि नी ॥ निम्ननाभीभीतिहरा भयदाभयहारिका ॥ भयप्रदाभया भीता अभीमाभीमनादिनी ॥ सुन्दरीशोभनासत्या क्षेम्याक्षे मकरीतथा ॥ सिन्दूराञ्चितसिन्दूरा सिन्दूरसदृशाकृतिः ॥ रक्ता रञ्जितनासाच सुनासानिम्ननासिका ॥ खर्व्वालम्बोदरीदीर्घा दी र्घघोणामहाकुचा ॥ कुटिलाचञ्चलाचण्डी चण्डनादप्रचण्डि का ॥ अतिचण्डामहाचण्डा श्रीचण्डाचण्डवेगिनी ॥ चाण्डाली चण्डिकाचण्डशब्दरूपाचचञ्चला ॥ चम्पाचम्पावतीचोस्तातीक्ष्णातीक्ष्णप्रियाक्षतिः॥ जलदाजयदायोगाजगदानन्दकारिणी॥ जगद्वन्द्याजगन्माता जगतीजगतक्षमा ॥ जन्याजयजनेत्रीचज यिनीजयदातथा ॥ जननीचजगद्धात्री जयाख्याजयरूपिणी॥ज

गन्माताजगन्मान्याजयश्रीर्जयकारिणी ॥ जयिनीजयमाताच जयाचविजयातथा ॥ खड्गिनीखड्गरूपाच सुखड्गाखड्गधारिणी ॥ खड्गरूपाखड्गकराखड्गिनीखड्गवल्लभा ॥ खड्गदाखड्गभावाच खड्ग देहसमुद्भवा॥खड्गागड्गधराखेलाखड्गिनीखड्गमण्डिनी ॥ शङ्खिनी चापिनीदेवीवज्रिणीशूलिनीमतिः ॥ वालिनीभिन्दिपालीचपा शीचअङ्कुशीशरी॥धनुपीचटकीचर्म्मादन्तीचकर्ण्णनालिकी॥ मु सलीहलरूपाच तूणीरगणवासिनी ॥ तूणालयातूणहरातूणस म्भवरूपिणी ॥ सुतूणीतूणखेदाचतूणाङ्गीतूणवल्लभा ॥ नानास्त्र धारिणीदेवी नानाशस्त्रसमुद्भवा ॥ लाक्षालक्षहरालाभा सुलाभा लाभनाशिनी ॥ लाभहारालाभकरा लाभिनीलाभरूपिणी ॥ ध रित्रीधनदाधान्याधान्यरूपाधराधनुः ॥ धुरशब्दाधुरामान्याध राङ्गीधननाशिनी ॥ धनहाधनलाभाच धनलभ्यामहाधनुः ॥ अ शान्ताशान्तिरूपाचश्वासमार्ग्गनिवासिनी ॥ गगणागणसेव्या च गणाङ्गावागवल्लभा ॥ गणदागणहागम्या गमनागमसुन्दरी॥ गम्यदागणनाशीचगदहागदवर्द्धिनी ॥ स्थैर्य्याचस्थैर्य्यनाशाच स्थैर्य्यान्तकरणीकुला ॥ दात्रीकर्त्रीप्रियाप्रेमा प्रियदाप्रियवर्द्धि नी ॥ प्रियहाप्रियभव्याचप्रियप्रेमाङ्गिपातनुः ॥ प्रियजाप्रियभ व्याच प्रियस्थाभवनस्थिता ॥ सुस्थिरास्थिररूपाचस्थिरदास्थै र्य्यवर्द्धिणी॥चञ्चलाचपलाचोला चपलाङ्गनिवासिनी ॥ गौरीका लीतथाछिन्नामायामान्याहरप्रिया ॥सुन्दरीत्रिपुराभव्यात्रिपुरेश्वर वासिनी॥त्रिपुरनाशिनीदेवीत्रिपुरप्राणहारिणी ॥ भैरवीभैरवस्था चभैरवस्यप्रियातनुः॥भवाङ्गीभैरवाकाराभैरवप्रियवल्लभा॥ काल दाकालरात्रिश्चकामाकात्यायनीक्रिया ॥ क्रियदाक्रियहाँकुब्या प्रियप्राणक्रियातथा ॥ क्रीङ्कारीकमलालक्ष्मीःशक्तिःस्वाहाविभु ः प्रभुः॥प्रकृति ः पुरुषश्चैवपुरुषापुरुषाकृतिः॥परम ः पुरुषश्चैव माया

नारायणीमतिः ॥ ब्राह्मीमाहेश्वरीचैव कौमारीवैष्णवीतथा ॥ वाराहीचैवचामुण्डा इन्द्राणीहरवल्लभा ॥ भर्ग्गीमाहेश्वरीकृष्णा कात्यायन्यपिपूतना ॥ राक्षसीडाकिनीचित्राविचित्राविभ्रमाता ॥ हाकिनीराकिनीभीतागन्धर्व्वागन्धवाहिनी ॥ केकरीकोटराक्षीच निर्म्मांसालूकमांसिका ॥ ललज्जिह्वासुजिह्वाच वालदा वालदायिनी ॥ चन्द्राचन्द्रप्रभाचान्द्री चन्द्रकान्तिषुतत्परा ॥ अमृतामानदापूपापातुष्टिः पुष्टीरतिर्धृतिः॥ शशिनीचन्द्रिकाकान्ति ज्र्ज्योत्स्नाश्री ः प्रीतिरङ्गदा ॥ पूर्णापूर्णामृताकल्पलतिकाकल्पदानदा ॥ सुकल्पाकल्पहस्ताच कल्पवृक्षकरीहनुः ॥ कल्पाख्याकल्पभव्याच कल्पानन्दकवन्दिता ॥ सूचीमुखी प्रेतमुखी उल्कामुखीमहामुखी ॥ उग्रमुखीचसुमुखीकाकास्याविकटानना ॥ कृकलास्याचसन्ध्यास्यासुकुलीशारमाकृतिः ॥ नानामुखीचनानास्यानानारूपप्रधारिणी ॥ विश्वाच्चर्य्याविश्वमाताचविश्वाख्याविश्वभाविनी ॥ सूर्य्यासूर्य्यप्रभाशोभासूर्य्यमण्डलसंस्थिता ॥ सूर्य्यकान्तिः सूर्य्यकरा सूर्य्याख्यासूर्य्यभावना ॥ तापिनीतापिनीधूम्रा मरीचिर्ज्ज्वालिनीरुचिः ॥ सुरदाभोगदाविश्वाबोधिनीधारिणीक्षमा ॥ युगदायोगहायोग्यायोग्यहायोगवर्द्धिनी ॥ वह्निमण्डलसंस्थाचवह्निमण्डलमध्यगा ॥ वह्निमण्डलरूपाचवह्निमण्डलसञ्ज्ञका ॥ वह्नितेजावह्निरागा वह्निदावह्निनाशिनी ॥ वह्निक्रियावह्निभुजा कलावह्नौस्थितासदा ॥ धूम्रार्च्चिषाउज्ज्वलिनी तथाचविस्फुलिङ्गिनी ॥ शूलिनीचसुरूपाचकपिलाहव्यवाहिनी ॥ नानातेजस्विनीदेवी परब्रह्मकुटुम्बिनी ॥ ज्योतिर्ब्रह्ममयीदेवीपरब्रह्मस्वरूपिणी ॥ परमात्मापरापुण्यापुण्यदापुण्यवर्द्धिनी ॥ पुण्यदापुण्यनाम्नीच पुण्यगन्धाप्रियातनुः ॥ पुण्यदेहापुण्यकरा पुण्यनि

न्दकनिन्दका ॥ पुण्यकालकरापुण्यासुपुण्यापुण्यमालिका ॥ पुण्यखेलापुण्यकेली पुण्यनामसमापुरा ॥ पुण्यसेव्यापुण्यखेल्या पुराणपुण्यवल्लभा ॥ पुरुषापुरुषप्राणापुरुषात्मस्वरूपिणी॥ पुरुषाङ्गीचपुरुषी पुरुषस्यकलासदा ॥ सुपुष्पापुष्पकप्राणापुष्पहापुष्पवल्लभा ॥ पुष्पाप्रियापुष्पहारापुष्पवन्दकवन्दका ॥ पुष्पहापुष्पमालाच पुष्पानिन्दकनाशिनी ॥ नक्षत्रप्राणहन्त्री चनक्षत्रालक्षवन्दका ॥ लक्ष्यमाल्यालक्षहारालक्षालक्षस्वरूपिणी ॥ नक्षत्राणीसुनक्षत्रा नक्षत्राहामहोदया ॥ महामाल्यामहामान्या महतीमातृपूजिता ॥ महामहाकनीयाच महाकालेश्वरीमहा ॥ महास्यावन्दनीयाच महाशब्दनिवासिनी ॥ महाशङ्खेश्वरीमीना मत्स्यगन्धामहोदरी ॥ लम्बोदरी चलम्बोष्ठीलम्बनिम्नतनूदरी ॥ लम्बोष्ठीलम्बनासाचलम्बघोणाललत्सुका ॥ अतिलम्बामहालम्बा सुलम्बालम्बवाहिनी ॥ लम्बार्हालम्बशक्तिश्चलम्बस्थालम्बपूर्व्विका ॥ चतुर्घण्टामहाघण्टा भण्टानादप्रियासदा ॥ वाद्यप्रियावाद्यरतासुवाद्यावाद्यनाशिनी ॥ रमारामासुवालाचरमणीयस्वभाविनी ॥ सुरम्यारम्यदारम्भारम्भोरूरामवल्लभा ॥ कामप्रियाकामकराकामाङ्गीरमणीरतिः ॥ रतिप्रियारतिरतीरतिसेव्यारतिप्रिया ॥ सुरभिः सुरभीशोभादिक्शोभाशुभनाशिनी ॥ सुशोभाचमहाशोभाऽतिशोभाप्रेततापिनी ॥ लोभिनीचमहालोभा सुलोभालोभवर्द्धिनी ॥ लोभाङ्गीलोभवन्द्याचलोभाहीलोभभासका ॥ लोभप्रियामहालोभालोभनिन्दकनिन्दका ॥ लोभाङ्गवासिनीगन्धविगन्धागन्धनाशिनी॥गन्धाङ्गीगन्धपुष्टाच सुगन्धाप्रेमगन्धिका ॥ दुर्गन्धापूतिगन्धाच विगन्धाअतिगन्धिका ॥ पद्मान्तिकापद्मवहा पद्मप्रियप्रियङ्करी ॥ पद्मनिन्दकनिन्दाच पद्मसन्तोषवाह

ना ॥ रक्तोत्पलवरादेवी रक्तोत्पलप्रियासदा॥ रक्तोत्पलसुगन्धा च रक्तोत्पलनिवासिनी ॥ रक्तोत्पलग्रहामाला रक्तोत्पलमनोहरा ॥ रक्तोत्पलसुनेत्राच रक्तोत्पलस्वरूपधृक् ॥वैष्णवीविष्णुपूज्याचवैष्णवाङ्गनिवासिनी ॥ विष्णुपूजकपूज्याच वैष्णवेसंस्थितातनुः ॥ नारायणस्यदेहस्था नारायणमनोहरा ॥ नारायणस्वरूपाच नारायणमनःस्थिता ॥ नारायणाङ्गसम्भूता नारायणप्रियातनुः ॥ नारीनारायणीगण्या नारायणगृहप्रिया ॥ हरपूज्याहरश्रेष्ठा हरस्यवल्लभाक्षमा ॥ संहारीहरदेहस्था हरपूजनतत्परा ॥ हरदेहसमुद्भूता हराङ्गवासिनीकुहूः ॥ हरपूजकपूज्याच हरवन्दकतत्परा ॥ हरदेहसमुत्पन्ना हरक्रीडासदागतिः॥ सुगणासङ्गरहिता असङ्गासङ्गनाशिनी ॥ निर्ज्जनाविजनादुर्ग्गा दुर्ग्गक्लेशनिवारिणी ॥ दुर्ग्गदेहान्तकादुर्ग्गारूपिणीदुर्ग्गतास्थिका ॥ प्रेतकराप्रेतप्रिया प्रेतदेहसमुद्भवा ॥ प्रेताङ्गवासिनीप्रेता प्रेतदेहविमर्दका ॥ डाकिनीयोगिनीकालरात्रिःकालप्रियासदा ॥ कालरात्रिहराकाला कृष्णदेहामहातनुः ॥ कृष्णाङ्गीकुटिलाङ्गीच वज्राङ्गीवज्ररूपधृक् ॥ नानादेहधराधन्या षट्चक्रकमवासिनी ॥ मूलाधारनिवासीच मूलाधारस्थितासदा ॥ वायुरूपामहारूपा वायुमार्ग्गनिवासिनी ॥ वायुयुक्तावायुकरा वायुपूरकपूरका ॥ वायुरूपधरादेवी सुषुम्नामार्ग्गगामिनी ॥ देहस्थादेहरूपाच देहध्येयासुदेहिका ॥ नाडीरूपामहीरूपा नाडीस्थाननिवासिनी ॥ इङ्गलापिङ्गलाचैव सुषुम्नामध्यवासिनी॥ सदाशिवप्रियकरी मूलप्रकृतिरूपधृक् ॥ अमृतेशीमहाशाली शृङ्गाराङ्गनिवासिनी ॥उत्पत्तिस्थितिसंहन्त्री प्रलयापदवासिनी ॥ महाप्रलययुक्ताच सृष्टिसंहारकारिणी ॥ स्वधास्वाहा हव्यवाहा हव्याहव्यप्रियासदा ॥ हव्यस्थाहव्यभक्षाच हव्यदेह

समुद्भवा ॥ हव्यक्रीडाकामधेनुस्वरूपारूपसम्भवा ॥ सुरभी नन्दनीपुण्या यज्ञाङ्गीयज्ञसम्भवा ॥ यज्ञस्थायज्ञदेहाच योनि जायोनिवासिनी ॥ अयोनिजासतीसत्या असतीकुटिलातनुः॥ अहल्यागौतमीगम्या विदेहादेहनाशिनी ॥ गान्धारीद्रौपदीदू ती शिवप्रियात्रयोदशी ॥ पञ्चदशीपौर्णमासीचतुर्दशीचपञ्च मी ॥ षष्ठीचनवमीचैवअष्टमीदशमीतथा ॥ एकादशीद्वादशीच द्वाररूपीभयप्रदा॥सङ्क्रान्त्यासामरूपाच कुलीनाकुलनाशिनी ॥ कुलकान्ताकृशाकुम्भा कुम्भदेहविवर्द्धिनी ॥ विनीताकुलव त्यर्थी अन्तरीचानुगाप्युषा ॥ नदीसागरदाशान्तिः शान्तिरू पासुशान्तिका ॥ आशातृष्णाक्षुधाक्षोभ्या क्षोभरूपानिवासि नी॥गङ्गासागरगाकान्तिः श्रुतिः स्मृतिर्द्धृतिर्म्महो॥दिवारात्रि२ पञ्चभूतदेहाचैवसुदेहका ॥ तण्डुलाछिन्नमस्ताच नागयज्ञोप वीतिनी ॥ वर्ण्णनीडाकिनीशक्ति२कुरुकुल्लासुकुल्लका ॥ प्रत्य ङ्गिराऽपरादेवी अजिताजयदायिनी ॥ जयाचविजयाचैवमहि षासुरघातिनी ॥ मधुकैटभहन्त्रीचचण्डमुण्डविनाशिनी ॥ नि शुम्भशुम्भहननी रक्तबीजक्षयङ्करी ॥ काशीकाशीनिवासीच म धुरापार्व्वतीपरा ॥ अपर्ण्णाचण्डिकादेवी मृडानीचाम्बिकाक ला॥शुक्लाकृष्णावर्ण्णवर्ण्णा शरदिन्दुकलाकृतिः ॥ रुक्मिणीरा धिकाचैव भैरव्या२परिकीर्त्तितम्॥अष्टाधिकसहस्रन्तुदेव्यानामा नुकीर्त्तनात्॥ महापातकयुक्तोऽपि मुच्यतेनात्रसंशयः॥ब्रह्महत्या सुरापानंस्तेयङ्कुर्व्वङ्गनागमः ॥ महापातककोटयस्तु तथाचैवो पपातकाः ॥ स्तोत्रेणभैरवोक्तेन सर्व्वन्नश्यतितत्क्षणात् ॥ सर्व्वं व्वा श्लोकमेकंव्वापठनात्स्मरणादपि॥ पठेद्वापाठयेद्वापि सद्योमु च्यतेबन्धनात् ॥ राजद्वारेरणेदुर्ग्गे सङ्कटेगिरिदुर्ग्गमे ॥ प्रान्त रेपर्व्वतेवापि नौकायाव्वामहेश्वरि ॥ वह्निदुर्ग्गभयेप्राप्ते सिंहव्या

ग्रभयाकुले ॥ पठनात्स्मरणान्मर्त्त्यो मुच्यतेसर्व्वसङ्कटात् ॥ अ
पुत्रोलभतेपुत्रन्दरिद्रोधनवान्भवेत् ॥सर्व्वशास्त्रपरोविप्रःसर्व्वयज्ञ
फलँल्लभेत् ॥ अग्निवायुजलस्तम्भङ्गतिस्तम्भँव्विवस्वतः ॥ मा
रणेद्वेषणेचैव तथोच्चाटेमहेश्वरि ॥ गोरोचनाकुङ्कुमेन लिखे
त्स्तोत्रमनन्यधीः॥गुरुणावैष्णवैर्व्वापि सर्व्वयज्ञफलँल्लभेत् ॥ व
शीकरणमत्रैव जायन्तेसर्व्वसिद्धयः ॥ प्रातःकालेशुचिर्भूत्वाम
ध्याह्नेचनिशामुखे ॥ पठेद्वापाठयेद्वापिसर्व्वयज्ञफलँल्लभेत् ॥ वा
दीमूकोभवेद्दुष्टोराजाचसेवकोयथा ॥ आदित्यमङ्गलदिने गुरौ
वापिमहेश्वरि ॥ गोरोचनाकुङ्कुमेन लिखेत्स्तोत्रमनन्यधीः ॥
गुरुणावैष्णवैर्व्वापिसर्व्वयज्ञफलँल्लभेत् ॥ धृत्वासुवर्ण्णमध्यस्थं
सर्व्वान्कामानवाप्नुयात्॥स्त्रीणाञ्चवामकरेधार्य्यम्पुम्नान्दक्षकरेतथा
॥ आदित्यमङ्गलदिने गुरौवापिमहेश्वरि ॥ शनैश्चरेलिखेद्वापि
सर्व्वसिद्धिलभेद्ध्रुवम् ॥ प्रान्तरेवाश्मशानेवा निशायामर्द्धरात्र
के ॥ शून्यागारेचदेवेशि लिखेद्यत्नेनसाधकः ॥ सिंहराशौगुरुग
ते कर्क्कटस्थेदिवाकरे ॥ मीनराशौगुरुगतेलिखेद्यत्नेनसाधकः ॥
रजस्वलाभगन्दृष्ट्वास्तत्रस्थोविलिखेत्सदा॥ सुगन्धिकुसुमैःशुक्लैः
सुगन्धिगन्धचन्दनैः ॥ मृगनाभिमृगमदैर्व्विलिखेद्यत्नपूर्व्वकम्॥
लिखित्वाचपठित्वाच धारयेच्चाप्यनन्यधीः ॥ कुमारीम्पूजयि
त्वाच नारीश्चापिप्रपूजयेत् ॥ पूजयित्वाचकुसुमैर्ग्गन्धचन्दनव
स्त्रकैः ॥ सिन्दूररक्तकुसुमैः पूजयेद्भक्तियोगतः ॥ अथवापूजयेद्दे
विकुमारीर्दशमावधीः॥ सर्व्वाभीष्टफलन्तत्र लभतेतत्क्षणादपि ॥
नात्रसिद्ध्यपेक्षास्ति नवामित्रारिदूषणम् ॥ नविचार्य्यश्चदे
वेशिजपमात्रेणसिद्धिदम् ॥सर्व्वदासर्व्वकालेषुषट्साहस्रप्रमाणतः
॥ बलिन्दत्त्वाविधानेनप्रत्यहम्पूजयेच्छिवाम् ॥ स्वयम्भूकुसुमैः
पुष्पैर्ब्बलिदानन्दिवानिशम् ॥पूजयेत्पार्व्वतीन्देवीम्भैरवीन्त्रिपुरा

त्मिकाम् ॥ ब्राह्मणान्भोजयेन्नित्यन्दशकन्द्वादशन्तथा॥अनेनवि धिनादेवि बालान्नित्यम्प्रपूजयेत्॥मासमेकम्पठेद्यस्तुत्रिसन्ध्यँव्वि धिनामुना ॥ अपुत्रोलभतेपुत्रन्निर्द्धनोधनवान्भवेत् ॥ सदाचा नेनाविधिना तथामासत्रयेणच ॥ कृतकार्य्यभवेद्देवि तथामास चतुष्टये ॥ दीर्घरोगात्प्रमुच्येत पञ्चमेकविराड्भवेत् ॥ सर्व्वैश्व र्य्यैलभेद्देविमासषट्केतथैवच ॥ सप्तमेखेचरत्वञ्च अष्टमेचबृहद्यु तिः ॥ नवमेसर्व्वसिद्धिःस्याद्दशमेलोकपूजितः ॥ एकादशेग जवश्योद्वादशेतुपुरन्दरः ॥ वारमेकम्पठेद्यस्तुप्राप्नोतिपूजनेफल म् ॥ समग्रंश्लोकमेकञ्चायः पठेत्प्रयतःशुचिः ॥ सपूजाफलमा प्नोति भैरवेणचभाषितम् ॥ आयुष्मत्प्रीतियोगेच ब्राह्मेन्द्रेचवि शेषतः ॥ पञ्चम्याञ्चतथाषष्ट्याञ्च्यत्रकुत्रापितिष्ठति ॥ श ङ्कानविद्यतेतत्र नचमायादिदूषणम् ॥ वारमेकंपठेन्मर्त्योमुच्य तेसर्व्वसङ्कटात् ॥ किमन्यद्बहुनादेविसर्व्वाभीष्टफलँल्लभेत्॥इति श्रीविश्वसारे महाभैरवविरचितंश्रीमत्त्रिपुरभैरवीसहस्रनामस्तो त्रंसमाप्तम् ॥ छ ॥ ॥ ॥

इति शाक्तप्रमोदेत्रिपुरभैरवीतन्त्रं समाप्तम् ।



इति
शाक्तप्रमोदे त्रिपुरभैरवीतन्त्रं
समाप्तम् ।